o/c

# A-I/3/2264/ 21

## द्वितीयसत्रार्द्धम्

## तृतीयपत्रम्

## फलितज्यौतिषम्

समयः घण्टात्रयम् | पूर्णाङ्काः 80

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** (15×2=30)

1. उच्चललाटयुतः जनः किं फलं प्राप्नोति?
2. कीदृशे नेत्रे पितृविनाशः?
3. स्त्रीकपोले मशकफलं किम्?

**अथवा**

"ऋजुबिम्बोपमोष्ठाभ्यां नरः"..............भवति। रिक्तं पूरयत।

4. हस्ताङ्गुलिलक्षणं सफलं लिखत।
5. नृपतेः पादलक्षणं वर्णयत।
6. कां नारीं परिवर्जयेत्?

**अथवा**

कीदृशाङ्गुलयः रोगहेतुकाः?

7. मृगपुरुषलक्षणं वर्णयत।
8. शङ्खिन्याः चरित्रं वर्णयत।
9. देवपुरुषचिह्नानि कानि?

**अथवा**

रेखादर्शने के नियमाः विचार्याः?

10. आरोग्यरेखा अल्परक्ता चेत् किं फलम्?
11. हस्ते पञ्चचक्राणां फलं लिखत।
12. कया रेखया नरः ज्यौतिषिकः भवति?

**अथवा**

अकालमृत्युयोगः कदा भवति?

13. सर्पदंशयोग: कदा?

14. एकस्मिन् हस्ते कति पर्वाणि भवन्ति?

15. रिक्तातिथय: करे कुत्र भवन्ति?

**अथवा**

पूर्णातिथय: कस्यामङ्गुल्यां भवन्ति? (5×6=30)

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।**

16. भाग्योदयविचारं सप्रमाणं विमर्शयत।

17. वर्षे शुभाशुभं कथं ज्ञेयम् इति सप्रमाणं विवेचयत।

**अथवा**

सूर्यरेखाया: सम्पूर्णफलं सप्रमाणं विविच्य केतुरेखाफलं साधारं विवेचयत।

18. हस्ते ग्रहाणां स्थानानि राशिस्थानानि च वर्णनीयानि।

19. वृषभपुरुषस्य फलं सप्रमाणं विवेचयत।

**अथवा**

पुंस्त्रीमशकफलानि विवेचयत।

20. हस्ते राहुरेखाफलं सप्रमाणं लिखत।

**अथवा**

भक्तियोगं सप्रमाणं वर्णयत।

(1×20=20)

**स. निबन्धात्मक: प्रश्न: समाधेय:।**

21. सन्तानरेखाफलं मणिबन्धरेखाफलं च सप्रमाणं विवेचयत।

**अथवा**

पर्वरेखाफलानि संख्यानुरोधेन यवचिह्नफलानि च सप्रमाणं विवेचयत।

**अथवा**

शशकपुरुषलक्षणं तथा सामुद्रिकोक्तं मेलापकविचारं स्पष्टयत।